तदा लग्नोदयैर्लग्नं मध्यसंज्ञं यथोदितम् ।
तत्क्रान्त्यक्षांशसंयोगो दिक्साम्येऽन्तरमन्यथा ॥
शेषं नतांशास्तन्मौर्वी मध्यज्या साभिधीयते ।
मध्योदयज्ययाभ्यस्ता त्रिज्याप्ता वर्गितं फलम् ॥
मध्यज्यावर्गविश्लिष्टं दृक्क्षेपः शेषतः पदम् ।
तत्त्रिज्यावर्गविश्लेषान्मूलं शङ्कुः स दृग्गतिः ॥
नतांशबाहुकोटिभ्यां स्फुटे दृक्क्षेपदृग्गती ।
एकज्यावर्गतश्छेदो लब्धं दृग्गतिजीवया ॥
मध्यलग्नार्कविश्लेषज्या छेदेन विभाजिता ।
रवीन्द्वोर्लम्बनं ज्ञेयं प्राक्पश्चाद्घटिकादिकम् ॥
मध्यलग्नाधिके भानौ तिथ्यन्तात् प्रविशोधयेत् ।
धनमूनेऽसकृत् कर्म्म यावत् सर्व्वं स्थिरीभवेत् ॥
दृक्क्षेपः शीततिग्मांश्वोर्मध्यभुक्त्यन्तराहतः ।
तिथिघ्नत्रिज्यया भक्तो लब्धं सावनतिर्भवेत् ॥
दृक्क्षेपात् सप्ततिहृताद्भवेद्वावनतिः फलम् ।
अथवा त्रिज्यया भक्तात् सप्तसप्तकसङ्गुणात् ॥
मध्यज्या दिग्वशात् सा च विज्ञेया दक्षिणोत्तरा ।
सेन्दुविक्षेपदिक्साम्ये युक्ता विश्लेषितान्यथा ॥
तया स्थितिविमर्द्दार्द्धग्रासाद्यं तु यथोदितम् ।
प्रमाणं वलनाभीष्टग्रासादि हिमरश्मिवत् ॥
स्थित्यर्द्धोनाधिकात् प्राग्वत् तिथ्यन्ताल्लम्बनं पुनः ।
ग्रासमोक्षोद्भवं साध्यं तन्मध्यहरिजान्तरम् ॥
प्राक्कपालेऽधिकन्मध्याद्भवेत् प्राग् ग्रहणं यदि ।
मौक्षिकं लम्बनं हीनं पश्चार्द्धे तु विपर्य्ययः ॥
तदा मोक्षस्थि. .दले देयं प्रग्रहणे तथा ।
हरिजान्तरकं शोध्यं यत्रैतत् स्याद्विपर्य्ययः ॥
एतदुक्तं कपालैक्ये तद्भेदे लम्बनैकता ।
स्वे स्वे स्थितिदले योज्या विमर्द्दार्द्धेऽपि चोक्तवत् ॥”
इति सूर्य्यसिद्धान्ते सूर्य्यग्रहणाधिकारः ॥)

ग्रहणिः, स्त्री, (गृह्णाति आक्रमते उदरभङ्गादिरूपेण नाड़ीविशेषावच्छिन्नं शरीरमिति । ग्रह उपादाने + “ग्रहेरनिः ।” उणां । ५ । ६७ । इति अनिः णत्वं च ।) ग्रहणीरोगः । इत्यमरटीकायां रायमुकुटः ॥

ग्रहणी, स्त्री, (ग्रहणि + “कृदिकारान्तादक्तिनः ।” इति ङीष् ।) अग्न्यधिष्ठाननाड़ी । स्वनामख्यातरोगः । तस्य निदानसम्प्राप्ती यथा,—
“अतीसारे निवृत्तेऽपि मन्दाग्नेरहिताशिनः ।
भूयः सन्दूषितो वह्निर्ग्रहणीमपि दूषयेत् ॥
एकैकशः सर्व्वशश्च दोषैरत्यर्थमूर्च्छितैः ।
सा दुष्टा बहुशो भुक्तमाममेव विमुञ्चति ॥
पक्वं वा सरुजं पूति मुहुर्ब्बद्धं मुहुर्द्रवम् ।
ग्रहणीरोगमाहुस्तमायुर्व्वेदविदो जनाः ॥”*॥
तस्य पूर्ब्बरूपं यथा,—
“पूर्ब्बरूपन्तु तस्येदं तृष्णालस्यं बलक्षयः ।
विदाहोऽन्नस्य पाकश्च चिरात् कायस्य गौरवम् ॥”
तस्य वातिकस्य निदानरूपे ।
“कटुतिक्तकषायातिरूक्षसन्दुष्टभोजनैः ।
प्रमितानशनात्यध्ववेगनिग्रहमैथुनैः ॥
मारुतः कुपितो वह्निं संछाद्य कुरुते गदान् ।
तस्यान्नं पच्यते दुःखं शुक्तपाकं खराङ्गता ॥
कण्ठास्यशोषः क्षुत् तृष्णा तिमिरं कर्णयोः स्वनः ।
पार्श्वोरुवङ्क्षणग्रीवारुगभीक्ष्णं विसूचिका ॥
हृत्पीड़ाकार्श्यदौर्ब्बल्यं वैरस्यं परिकर्त्तिका ।
गृद्धिः सर्व्वरसानाञ्च मनसः सदनं तथा ॥
जीर्णे जीर्य्यति चाध्मानं भुक्ते स्वास्थ्यमुपैति च ।
स वातगुल्महृद्रोगप्लीहाशङ्की च मानवः ॥
चिराद्दुःखं द्रवं शुष्कं तन्वामं शब्दफेनवत् ।
पुनः पुनः सृजेद्वर्च्चः श्वासकासार्द्दितोऽनिलात् ॥”
पैत्तिकस्य तस्य निदानरूपे ।
“कट्वजीर्णविदाह्यम्लक्षाराद्यैः पित्तमुल्वणम् ।
आप्लावयद्धन्त्यनलं जलं तप्तमिवानलम् ॥
सोऽजीर्णं नीलपीताभं पीताभः सार्य्यते द्रवम् ।
पूत्यम्लोद्गारहृत्कण्ठदाहारुचितृड़र्द्दितः ॥”
श्लैष्मिकस्य तस्य निदानरूपे ।
“गुर्व्वतिस्निग्धशीतादिभोजनादतिभोजनात् ।
भुक्तमात्रस्य च स्वप्नाद्धन्त्यग्निं कुपितः कफः ॥
तस्यान्नं पच्यते दुःखं हृल्लासच्छर्द्यरोचकाः ।
आस्योपदेहमाधुर्य्यकासष्ठीवनपीनसाः ॥
हृदयं मन्यते स्त्यानमुदरं स्तिमितं गुरु ।
दुष्टो मधुर उद्गारः सदनं स्त्रीष्वहर्षणम् ॥
भिन्नामश्लेष्मसंसृष्टगुरुवर्च्चःप्रवर्त्तनम् ।
अकृशस्यापि दौर्ब्बल्यमालस्यञ्च कफात्मके ॥
पृथग्वातादिनिर्द्दिष्टहेतुलिङ्गसमागमे ।
त्रिदोषं निर्द्दिशेदेवं तेषां वक्ष्यामि भेषजम् ॥”
तस्यासाध्यस्य लक्षणं यथा,—
“लिङ्गैरसाध्यग्रहणीविकारो
यैस्तैरतीसारगदो न सिध्येत् ।
वृद्धस्य नूनं ग्रहणीविकारो
हत्वा तनुं नो विनिवर्त्तते च ॥”
इति माधवकरः ॥
तस्य चिकित्सा यथा, गारुड़े १७४ अध्याये ।
“चिकित्साथ ग्रहण्यास्तु ग्रहणी चाग्निनाशिनी ।
चित्रकक्वाथकल्काभ्यां ग्रहणीघ्नं घृतं हविः ॥”*॥
हरिरुवाच ।
“मरीचं शृङ्गवेरञ्च कुटजत्वचमेव च ।
पानाच्च ग्रहणी नश्येत् शशाङ्ककृतशेखर ! ॥”
इति तत्रैव १८७ अध्यायः ॥
“अङ्कोटमूलकर्षार्द्धं पिष्टं तण्डुलवारिणा ।
सर्व्वातीसारग्रहणीं पीतं हरति भूतप ! ॥
मरीचशुण्ठीकुटजत्वक्चूर्णन्तु गुड़ान्वितम् ।
क्रमात्तत् द्विगुणं पीतं ग्रहणीशाधिनाशनम् ॥”
इति तत्रैव १८६ अध्यायः ॥ * ॥
अथ सामान्यग्रहणीरोगस्य चिकित्सा ।
“ग्रहणीमाश्रितं रोगमजीर्णवदुपाचरेत् ।
लङ्घनैर्द्दीपनीयैश्च सदातीसारभेषजैः ॥
दोषं सामं निरामञ्च विद्यादत्रातिसारवत् ।
अतीसारोक्तविधिना तस्यामञ्च विपाचयेत् ॥
पेयादिपटुलघ्वन्नं पञ्चकोलादिभिर्युतम् ।
दीपनानि च तक्रञ्च ग्रहण्यां योजयेद्भिषक् ॥
कपित्थविल्वचाङ्गेरीतक्रदाड़िमसाधिता ।
यवागूः पाचयत्यामं शकृत् संवर्त्तयत्यपि ॥”
संवर्त्तयति घनीकरोति ॥ * ॥
अथ तक्रम् । तत्र गोदधिगुणाः ।
“गव्यं दध्युत्तमं बल्यं पाके स्वादु रुचिप्रदम् ।
पवित्रं दीपनं स्निग्धं पुष्टिकृत् पवनापहम् ॥
उक्तं दध्नामशेषाणां मध्ये गव्यं गुणाधिकम् ॥”
अथ माहिषीदधिगुणाः ।
“माहिषं दधि सुस्निग्धं श्लेष्मलं वातपित्तनुत् ।
स्वादुपाकमभिष्यन्दि वृष्यं गुर्व्वस्रदूषणम् ॥”
अथ छागीदधिगुणाः ।
“आजं दध्युत्तमं ग्राहि लघु दोषत्रयापहम् ।
शस्यते श्वासकासार्शः-क्षयकार्श्येषु दीपनम् ॥”
उत्तमं ग्राहिणां मध्ये श्रेष्ठं इत्यर्थः ॥
अथ तक्रस्य भेदाः ।
“तक्रन्तु घोलमथितोदश्वित्तक्रप्रभेदतः ।
सुश्रुताद्यैर्मुनिश्रेष्ठैश्चतुर्द्धा परिकीर्त्तितम् ॥
ससरं निर्जलं घोलं मथितन्त्वसरोदकम् ।
तक्रं पादजलं प्रोक्तमुदश्विच्चार्द्धवारिकम् ॥
वातपित्तहरं घोलं मथितं कफपित्तनुत् ।
उदश्वित् कफदं बल्यं श्रमघ्नं परमं मतम् ॥”
अथ तक्रस्य गुणाः ।
“तक्रं ग्राहि कषायाम्लं मधुरं दीपनं लघु ।
वीर्य्योष्णं बलदं वृष्यं प्रीणनं वातनाशनम् ॥
यान्युक्तानि दधीन्यष्टौ तद्गुणं तक्रमादिशेत् ।
ग्रहण्यादिमतं तक्रं पथ्यं संग्राहि लाघवात् ॥
वातघ्नमम्लसान्द्रत्वात् सद्यस्कं त्वविदाहि च ।
किञ्च स्वादु विपाकित्वान्न च पित्तप्रकोपणम् ॥
कषायोष्णविकारित्वाद्रौक्ष्याच्चैव कफे हितम् ॥”
अथोद्धृतस्तोकोद्धृतानुद्धृतघृतस्य तक्रस्य गुणाः
“समुद्धृतघृतं तक्रं पथ्यं लघु विशेषतः ।
स्तोकोद्धृतघृतं तस्माद्गुरु वृष्यं कफापहम् ॥
अनुद्धृतघृतं सान्द्रं गुरु पुष्टिकफप्रदम् ॥”
अथ दोषविशेषे तक्रविशेषाः ।
“वातेऽम्लसैन्धवोपेतं पित्ते स्वादु सशर्करम् ।
पिबेत्तक्रं कफे चापि क्षारत्रिकटुसंयुतम् ॥
हिङ्गुजीरयुतं घोलं सैन्धवेनावधूलितम् ।
ग्रहण्यर्शोऽतिसारघ्नं भवेद्वातहरं परम् ॥
रोचनं पुष्टिदं बल्यं वस्तिशूलविनाशनम् ॥”
अथामपक्वतक्रगुणाः ।
“तक्रमामं कफं कोष्ठे हन्ति कण्ठे करोति च ।
पीनसश्वासकासादौ पक्वमेव विशिष्यते ॥”*॥
अथ तक्रस्य निषेधः ।
“नैव तक्रं क्षते दद्यान्नोष्णकाले न दुर्ब्बले ।
न मूर्च्छाभ्रमदाहेषु न रोगे रक्तपैत्तिके ॥”*॥
अथ तक्रस्य गुणोत्कर्षः ।
“न तक्रसेवी व्यथते कदाचि-
न्न तक्रदग्धाः प्रभवन्ति रोगाः ।
यथा सुराणाममृतं सुखाय
तथा नराणां भुवि तक्रमाहुः ॥” * ॥
“मुद्गयूषं रसं तक्रं धान्यजीरकसंयुतम् ।
सैन्धवेनान्वितं दद्यात् षड्यूषमिति कीर्त्तितम् ॥”
रसं लघु ग्राहि मांसभवरसम् । इति षड्यूषम् ॥
“कर्षं गन्धमर्द्धपारदसमे कुर्य्याच्छुभां कज्जलीं
त्र्यर्षं मूषणतश्च पञ्चलवणं चार्द्धेच कर्षं पृथक् ।
भृष्टं हिङ्गु च जीरकद्वययुतं सर्व्वार्द्धसङ्गान्वितं